Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मार्गशीर्षाङ्कः

॥ श्रीशः शरणम् ॥

मधुरवाणी

संस्कृतमासपत्रिका

संस्थापकः
वै. बुलीश्रीनिवासाचार्यः
संस्कृतसाहित्यभूषणम्

सम्पादकः
पं. गलगलीरामाचार्यः
संस्कृतसाहित्यरत्नम्

सहसम्पादकः
पं. गलगलीपण्ढरीनाथाचार्यः
सं. सा. सुधाकरः

वार्षिकं मूल्यम् रूपकपञ्चकम्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अनुक्रमणिका

विषयाः	लेखकाः	पृष्ठः
१ मङ्गलम्—सुभाषितम्	संपादकः	१
२ प्राप्तपत्रम्	श्रीमाधवः	२
३ प्राप्तिः स्वीकारश्च		३
४ 'मला पहा'	पं. मङ्गलवेदीबालाचार्याः	४
५ पाकिस्तानस्य आसुरी वार्ता	पं. श्रीपाद दामोदर सातवळेकराः	६
६ अमेरिकायां भारतमाहात्म्यः संपूजितः	" "	७
७ श्रीराष्ट्रभाषाप्रार्थना	पं. मङ्गलवेदीबालाचार्याः	८
८ 'विकसति हृदयाब्जं ज्ञानसूर्येण नित्यम्	पं. हुलिकविमहाभागाः बी. ए.	९
१० अहो! अपहृतं भारतप्रजाप्राण—सर्वस्वम्	सहसंपादकः	१०
११ श्रीसतीविलासकाव्यम्	राजकविः महामहोपाध्यायः श्री. के. एस्. कृष्णमूर्तिशास्त्रिणः	१७
१२ अहो अपहृतं भारतप्रजाप्राण—सर्वस्वम	सहसंपादकः	२५
१२ दक्षमखरक्षणं नाम डिमरूपकम्	पं. सरसकविराजः रामानुजाचार्याः	२६
१३ काफीपानविडम्बनम्	पं. के. व्ही. कृष्णमूर्तिशास्त्रिणः डेक्कन कॉलेज रिसर्च	३१

पुनरावश्यकी सूचना

देयधन (व्ही. पी.) सूचनामन्वीक्ष्यैवेयदवधि तूष्णीमङ्कान् स्वीकृतवन्तः केचन महाशया (?) आश्वीन-कार्तिकाङ्कं परावर्तयन्। सौजन्यस्यायमन्यः पन्थाः। सुरवाणीप्रणयातिरेकाविष्कारस्येतराक्षुण्णेयं नवीना पदवी। सर्वेऽपि ग्राहका यदि अपूर्वामिमां पदवीममुसरेयुस्तर्हि सुरवाणी अचिरादे सुरलोकवासिन्येव स्यान्निश्चितम्। परं भूलोकेऽपि सुरसरस्वतीसाम्राज्यमभिच्छवः स्वयमेव धनादेशद्वारा मूल्यधनं प्रेषयन्तु। अथवा व्ही. पी. स्वीकुर्वन्तु। व्ही. पी. परावर्तने महती हानिः संजायते न इति विमर्शनीयम्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

॥ श्रीशः शरणम् ॥

मधुरवाणी.

सुधानिष्यन्दिन्या मधुरमधुरालापकलया
खलावज्ञामूर्च्छाभरमपहरन्ती सुरगिरः ।
मनोज्ञालङ्कारा रसिकजनचेतांसि सहसा
वशीकुर्वाणेयं भुवि मधुरवाणी विजयते ॥

१४ वर्षे] वेळगांव १८७१ शकस्य [९ सञ्चिका

राधाधरमधुस्यन्दमिलिन्दाय मधुद्विषे ।
कृष्णापटकुविन्दाय गोविन्दाय नमोऽस्तु नः ॥

मङ्गलम्

हेमन्ते हिममारुतेन नितरां वत्सोऽयमावेपते
राधे ! स्वीकुरु सत्वरं तव बलादौर्णोत्तरीयान्तरिं ॥
इत्यादेशवशेन नन्दसुदृशः प्रेम्णाऽऽददाना हरिः
कादम्बक्षतकोशरम्यनलिनीशोभाऽस्तु राधा मुदे ॥

सुभाषितम्

मृष्टान्नाशन–पेयमान–मधुरालेह्यादिकं शर्करे !
सर्वं विस्मृतमेव सर्वसुखदस्वातन्त्र्यलाभात्परम् ॥
आस्वादस्त्वधुना सुदुर्घटतमस्तत्रापि नातिव्यथा
यत्त्वद्दर्शनमप्यभूदसुलभं तेनैव दूये भृशम् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्राप्तपत्रम्

अन्यदीयलेखानां वयं न प्रतिभुवः

मातृच्छेदविषण्णानां पितृच्छेदः समागतः । पूर्वं यवनमनस्समाधानाय भारतभूमातुः शरीरं नैकधा विच्छिन्नं भारतोद्धारबद्धपरिकरैर्नेतृपरिवृढैः । इदानीं तु भारतजीवातोः पितृस्थानीयस्य धर्मदेवस्य समूलच्छेदाय प्रयत्यते इत्यहो परा काष्ठा कलिसाम्राज्यप्राबल्यस्य । अहो वैदेशिकशिक्षणसंस्कारदुष्परिपाकः । अहो विवेकवैकल्यपौष्कल्यम् । अधुना मन्त्रिमण्डलप्रविष्टेन डॉ. अंबेडकरेण वरिष्ठविधानपरिषदि योऽधुना हिंदुविधिः प्रस्तावितः सोऽयमवश्यं स्वीकार्यः, न चेदिदानीन्तनं मन्त्रिमण्डलं स्वपदान्निवृतं भवेदिति महताऽऽग्रहेण धर्मच्छेदैकप्राणस्य विधेरस्य निर्णयाय बद्धदीक्षाः प्रयतन्ते नेतृपदाधिष्ठिताः । तेषामेव वर्चस्वितयाऽयं विधिः स्वीकृतः स्यादित्यत्र नास्ति संशयः । पाश्चात्यविद्यासंस्कारविकृतमनस्काः प्रयतन्तां नाम धर्मध्वंसैकलक्ष्यस्य विधेरस्य शिरोधारणेन नर्तनाय । परं विधेरस्य प्रतिबन्धाय किं वाऽऽचरितं सनातनधर्मप्रणयिभिर्जनैः विद्वद्भिर्विशेषतो मठाधीशैः । धर्मानुयायिनः सामान्यजना विद्वांसश्च महर्घतासमये केवलमुदरचिन्तयैव ग्रस्ततया समुदासतां नामात्र विषये । परं धर्मसंरक्षणायैव प्रतिष्ठापितेषु पीठेषु समधिष्ठितै विभवसमृद्धैः सन्न्यासिभिः धर्मरक्षणाय किं वाऽऽचरिष्यति, किमनुष्ठीयते, किं वाऽनुष्ठास्यते । नैतेषां परिवारपोषणाय पूर्वतपस्विभिर्यतीश्वरैर्न संपादितं विपुलमैश्वर्यम् । किन्तु विद्यार्थिविद्वत्परिपोषणेन विद्याप्रचाराय धर्मप्रसाराय । परमिदानीन्तनैः संपत्सम्पन्नैः कर्मन्दिपदवाच्यैः पीठाधीशैः विद्यार्थिनो विद्वांसो वा नो पोष्यन्ते । (विद्यार्थिभिः विद्वद्भिरेव च धनाभावेनोपोष्यते) । न वा विद्याप्रचारो धर्मप्रसारो वा विधीयते । एकतः सुधारका धर्मनिर्मूलनाय महोत्साहमावहन्ति । अपरतः दीन–दूनजनता, उदासते । पीठभूषणा यतिमणयः परिवारपोषणैकलक्ष्यतया नेतो दृष्टिमपि क्षिपन्ति । अस्यामवस्थायां कथं नाम न प्रादुर्भवेयु-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

हिन्दुविधिसदृशाः प्रस्तावाः। ईदृशविधीनामनाविर्भाव एव विस्मयकरः। एतद्विधिदुष्परिणामं किं नाम न जानते पीठाधीशाः। जानन्तोऽपि किं सुप्तिनाट्यमाचरन्ति। अधुनाऽपि जागृताः स्वारूढपीठमहतीं मनस्याकलय्य धर्मध्वंसविधिविरोधाय सहस्राधिकशिष्यैः सह धर्मरक्षणाय परिकरमाबध्नन्तु सत्वरम्। विफलैवेयं सूचनेति जानीमो वयम्। कालाय तस्मै नमः

(ले.— माधवः)

कठोरेयं सुहृदां सूचना न सर्वानेवोपस्पृशति पीठाधीशान्। यतः सन्ति केचन महात्मनो व्रतीश्वराः अहर्निशं विद्याप्रसारैकपरायणाः। परं ये न तथाविधास्तादृशां स्वीयकर्तव्यकर्मणि जागरूका भवेयुरित्यत्रैव तात्पर्यं सुहृदामिति विज्ञेयम्। हिन्दुविधिविषये आगामिन्यङ्के लेखनीं व्यापारयिष्यामः।

(संपादकः)

प्राप्तिः स्वीकारश्च

संस्कृतानुशीलनविवेकः— स्तोकं संस्कृतलेखभासुरो बहुतरमाङ्गल-भाषामयोऽयं बृहदाकारो ग्रन्थः अस्मत्प्रियसुहृद्भिः भूतपूर्वशिक्षकशिक्षणमहा-विद्यालय (बी. टी. कालेज) प्राध्यापकैः श्रीहुपरीकरमहाभागैरभिप्रायायानु प्रेषितोऽस्मत्सविधे। अत्रकाशाभावादागामिन्यङ्के सविस्तरमेष ग्रन्थः परामर्श-पदवीमुपनेष्यते।

मञ्जूषा— संस्कृतमासपत्रिकेयं कलकत्तातः प्रचाल्यते श्रीक्षितीश-भट्टोपाध्यायमहाभागैश्चतुर्वर्षेभ्यः। आगामिन्यङ्केऽस्मदासयमाविष्करिष्यामः।

सर्वज्ञसंदेशः—द्वैतमतप्रबोधकमिदं कर्नाटकभाषामयं मासपत्रमिदम्। संपादका अस्य पण्डित चिमनहळ्ळी रघुनाथाचार्या बेंगळूरनिवासिनः। अभिप्रायमङ्कान्तरे प्रकटीकरिष्याम इति दिक्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

'मलापहा'

लेखकः– मंगलवेदी बाळाचार्यः

अयि; गीर्वाणवाणीप्रणयिनः किमिदं संस्कृतभाषापत्रिकासु महाराष्ट्रभाषायामिव शिरोलेखनं दृश्यते इति शंका भवति किल। तर्हि मा चिन्तयंतु महाभागास्तथा। गीर्वाणवाणीप्रभाव एव तथा। सुन्दरारविन्दनयनगोविन्दमुखेन्दीवरनिःसृता नैसर्गिकी वाणीयं मन्दामन्दश्रोतृवृन्दानुकूलमातृभाषाशब्दश्रवणसमानानंदमुत्पादयति। तथाचेदर्थस्तु कोऽयमस्यानन्ददायी पदस्य 'श्रुणुत' स्वाभाविकाप्राकृतशब्दोयं स्वस्मिन् गूढतया विराजमानां देवीं दर्शयितुं जागर्ति माहाराष्ट्रभाषापरिचितानाम्। कासा देवी। शब्दे निलीना। सैव जगन्मंगला त्रिलोकपावनी गोविंदाद्यामचरणांबुजांगुष्ठनखनिर्भिन्ना मंगलतरंगिणी संसारतापापनोदनपट्वी श्रीगंगा। सा वसन्त्यपि दूरे हिमाचलदिग्भागे, सांप्रतं कर्नाटके स्वच्छंदतया प्रवहन्त्या मलप्रभायाः सन्निधावागत्य स्वदर्शन–स्नान–पानादिभिरुद्धृता भवेयुर्दीना दुर्बला अशक्ताश्चेत्याव्हयति पर्वणि पर्वणि–मलापहाख्यनाम्ना। इयं च देवी मलप्रभा नदी देवनदीसहवासेन तद्गुणधारिणी "मलहारिणी प्रभा यस्यां सा मलप्रभा इति समासरीत्या मलापहाख्यनाम धृत्वा तन्नाम सार्थकं कर्तुं प्रतिज्ञातवतीव स्वमहिम्ना निर्माय च क्षेत्राणि निजतीरयोरुपरि तत्रतत्र, भक्तजनोद्धरणक्षमा, कुलकुंभाख्यग्रामे प्रादुर्भूतेयं वेणुग्राम (बेळगांव) धाराप्रान्त (धारवाड) विजयपुर (विजापूर) मंडलेषु प्रवहन्ती समुद्रराजसदनं प्रतिगन्तुकामा महात्मभिः साकं गमनमेव वरमिति मन्वाना दृष्ट्वा च कृष्णवेणी तया साकं जिगमिषया संगमक्षेत्रे तामेव विशति। यत्र च संगमे स्थानं रम्यमतीव। महादेवस्य देवालयस्तपोवनमिव दृश्यते। यागार्थमागत्य स्नात्वा पुण्यतीर्थे, भक्ता गतपापा भवन्ति। तदर्थमेव 'मला पहा' इति संबोध्य महाराष्ट्रभाषानुसारेण 'मां पश्यथ,' तदा मलमपहरामीति बुध्या प्रवहन्त्यां नद्यां पर्वणि पर्वणि स्नात्वा पूता भवेयुः सज्जना इति प्रार्थयामहे।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

एवं 'मलापहा' ख्य पवित्रनाम्ना प्रवहन्तीं नदीं दृष्ट्वा तीरे चाल्याः तपस्तप्तुं निश्चित्य मनसि, शिष्यैः साकमागत्य 'किरीटकर्णकुसुमवलय' (मुगुटकानहुबळी) नगरसमीपे वसतिं चक्रुः श्रीयादवार्याः। अस्य प्रदेशस्याख्यायिकापि निम्नलिखितरीत्या वर्तते। एकदा 'विजयनगर' साम्राज्याधिपतिरच्युतकृष्णराजभूपो दिग्विजयं कृत्वा दक्षिणदिग्भागे, मार्गानुसारेण दृष्ट्वा च स्थानमिदं रम्यमुषित्वा कतिचिद्दिनानि तत्र, निजराज्यांकितप्रदेशोयमिति स्वनाम्ना वेदिकामेकां कारयामस तत्रस्याश्वत्थवृक्षपरिवृताम्।

अद्यापि "अच्युत राजवेदिका" इति प्रसिद्धं क्षेत्रं विराजते मलप्रभातीरे। अत्रैव वेदिकासमीपे निर्मायैकां पर्णशालां वसतिं चक्रुरेते महानुभावाः यादवार्यगुरवः। प्रत्यहं मलापहास्नानं, सुधाप्रवचनं, कुलस्वामिश्रीनरसिंहपूजनं राजर्षिनिर्मितवेदिकापार्श्वस्थमहेशलिंगदर्शनमेवमासीत्तेषां दिनचर्या। पौनःपुन्येन सुधामंगलमहोत्सवेन सुधामयमभूदिदं तपोवनम्। एवं दिनेषु गच्छत्सु सा च प्राप्ता पुण्यतमा तिथिः वैशाखशुक्लपूर्णिमा। तद्दिने प्रातः स्वप्ने परमानन्ददायिनं परमपावनं भक्तार्तिविनाशकं प्रह्लादवरदं श्रीलक्ष्मीनृसिंहं ददृशुरार्याः। तदा जातानन्दाः प्रणिपत्य देवोत्तमं नखशिखान्तं, स्वामिनमवलोक्य च वारं वारं, बद्धांजलयोऽतिष्ठन्। बाष्पगद्गदकंठाः सुधामयवाण्या पुष्कलाभिः स्तुतिभिरपि प्रीणयामासुरेनं स्वामिनम्। प्रीतश्च स्वामी नृसिंहः प्रोवाच तान् महर्षीन्। भो; अद्य प्रातः स्नानकाले तव, चतुर्वितस्तिपरिमितैका सूक्ष्मशिला तरङ्गैः सह प्रवहति। शिरश्च ते स्पृशत्यवगाहनसमये तदा गृहाण तां, तदुपरि श्रीगन्धेन लिखित्वा च मन्मूर्तिं कामधेनुं च तां वेदिकोपर्यश्वत्थवृक्षमूलभागे प्रतिष्ठापयेत्युक्त्वान्तर्धानमयात्। सुखस्वप्नेन हर्षोद्रिक्तमानसास्तद्दिने, प्रातर्विधिं समाप्य स्नानार्थमागतास्ते नद्यामवतेरुः। संस्मृत्य स्वप्नवृत्तान्तं तत्कौतुकप्रसंगदर्शनोत्कंठाः कृतस्नानसंकल्पा अवगाहनसमये शिलास्पर्शमनुभूय मलापहामंगलतरङ्गैरांदोलितगात्रा हस्ते गृहीत्वा च शिलां तां भूयो भूयो नमस्कृत्य कृतान्हिका विलिख्य नृहरेराकृतिं कामधेनोश्च

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सज्जनैः सह पंचरात्रागमसूक्तोक्तरीत्या प्रस्थापयामासुर्वृक्षमूले च स्वामिनम्। तद्दिनादारभ्यार्याणामाज्ञया प्रतिवर्षं प्रभवति पूर्णिमायां वैशाखे महोत्सवः। इदानीमपि वेदिकानृसिंहक्षेत्रमिति वदन्ति तत्तपोवनं मलापहार्तारगम्। पूर्वमत्र महर्षिश्चवनभार्गवो यज्ञमतनोदिति कथयन्ति प्राक्तनाः। तद्यज्ञीयभस्म-राशयोऽपि दरीदृश्यन्तेऽस्मिन् क्षेत्रे।

पाकिस्तानस्य आसुरी वार्ता

ले.—सातवळेकर दामोदर सूनुः श्रीपादः

पश्चिमीय—पाकिस्ताने अल्पल्पाः हिन्दवः अतिष्ठन्, येषां परित्राणाय तत्रत्यः शासकः यवनः बद्ध-प्रतिज्ञः आसीत्। परम् अधुना तेन एव शासकेन मोहमदीयेन परिपीडिताः ते हिंदवः, तस्मात् स्थानात् इदानीं पलायितुम् अपि असमर्थाः, कराचीस्थितं भारतीय-राज दूतं, 'तान् भारतं प्रति नेतुं' अभ्यर्थयन्ते। कराची-भारत-राजदूतस्य कार्यालयम् उपेताः अपि बहवः हिन्दवः हृतसर्वस्वाः हीनाः दीनाः क्षीणाः नग्नाः भग्नाः परितप्ताः सन्त्रस्ताः दुःखेन व्याप्ताः स्वकीयं दैवम् एव दूषयन्तः, विपत्ति-परिमार्जनस्य उपायं अपश्यन्तः किंकर्तव्यतामूढा इव सञ्जाताः दृश्यन्ते।

एतेन इत्थं प्रतीयते, यत् पाकिस्तान-शासकाः मोहमदीयाः तत्र एकम् अपि हिंदुं न स्थापयितुम् इच्छन्ति। एषा तेषां शासनपद्धतिः अस्ति।

एवम् एव पूर्वपश्चिमयोः वङ्गविभागयोः अल्पसंख्यकानाम् अधिकारान् संरक्षितुं निर्मितायाः नवसमितेः अध्यक्षेण श्रीमता मित्राभिधेयेन संयुक्तराष्ट्र-संघस्य प्रधानमन्त्रिणे कलिकत्तानगरात् अक्टूबरस्य चतुर्दश्यां यत् पत्रं प्रेषितं, तेन पत्रेण स्फुटतरं परिज्ञायते, यत् पूर्ववङ्गीय-पाकिस्तानस्य मोहमदीयाः शासकाः तं प्रदेशं केवलं यवनप्रदेशं एव निर्मातुम् इच्छन्ति। एतदर्थं तस्मात् प्रदेशात् हिन्दून् बहिष्कर्तुम् अधुना ते निर्दयं प्रयतन्ते।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

गते वर्षद्वये पूर्वपलायनात् अवशिष्टेषु हिन्दुषु २० लक्षाः जनाः इदानीं पाकिस्तानात् पुनः पलायितुं विवशाः अभूवन्। इत्थं चतुर्लक्षाः परिवाराः स्वीयां कोटिकोटिमुद्रणां संपत्तिं तत्रैव परित्यज्य भारते कालं यापयितुं इच्छन्ति।

यदि ते हिंदुधर्मं त्यक्त्वा मोहमदधर्मं स्वीकृत्य तत्रैव तिष्ठेयुः, तर्हि ते सुखेन तत्रैव स्थातुं, कार्यव्यवहारं च कर्तुं शक्ष्यन्ति। पाकिस्ताने पारसीकाः खिष्टीनाः, याहुदाः, चीनीयाः, जापानीयाः, यूरोपीयाः वा स्थातुं शक्नुवन्ति, व्यवसायं अपि कर्तुं समर्थाः भवन्ति। परं केवलं हिंदुधर्मावलम्बिनः एव तत्र स्थातुं न अर्हाः!! किं अयं कालस्य क्षोभः। विपरीता खलु रीतिः दैवस्य। तत्रत्याः यवनाः पूर्वं हिंदवः एव आसन्। ते भीत्या, प्रलोभेन, भोगाभिलाषेण वा मोहमदाधीनाः संजाताः। एतेन धर्मपरिवर्तनेन ते एव पूर्वे हिंदूनां बान्धवाः इदानीं तानेव स्वकीयान् हिंदुबान्धवान् निहन्तुं उद्यताः दृश्यन्ते। ये तु वदन्ति सर्वाणि धर्ममतानि समानानि इति, ते एव अत्र प्रष्टव्याः, किं भारते तथा पाकिस्ताने किं समान एव धर्मस्य पन्था दृश्यते, उत अहो विपरीतः? सर्वैः हिंदुभिः मिलित्वा निर्णेतव्यः एष प्रश्नः।

अमेरिकायां भारतस्य महामात्यः संपूजितः

भारतस्य महामात्यः पण्डितो जवाहरलाल-नेहरुः इदानीम् अमेरिकायां तत्रत्येन अध्यक्षेण आदरेण निमंत्रितो भूत्वा गतः। अस्य तत्र अमेरिकायाः राष्ट्राध्यक्षेण महान् सत्कारः कृतः सः अयं अपूर्वः आसीत् सर्वेषां दृष्टौ। तथा च तत्र पं. जवाहरलालस्य यः सत्कारः राजप्रजाभ्यां क्रियते, स खलु असाधारण एव इति कथ्यते सर्वैः। अर्धमार्गात् एव अस्य संमानस्य अभूत् आरंभः। राष्ट्रपतेः ट्रूमनस्य स्वकीयेन वायुयानेन पं. जवाहरलालः यदा अमेरिकां प्राप्तः, तदा वायुयानस्य उत्तरणस्थाने राष्ट्रपतिः ससैनिक- स्वयं एव स्वकीयैः मंत्रिभिः सह उपस्थितः आसीत्। सः सैनिकानां अभिवादनं माननीयाय

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

भारतस्य महामात्याय महता आदरेण समार्पयत् । एतस्मिन् एव समये शतघ्नीनां द्वादशवारं प्रचण्डं ध्वानम् अभूत् ।

वायुयानात् सोपानमार्गेण अवतरतः नेहरोः पाणिप्रपीडनपूर्वकं राष्ट्रपतिः भारतीयं नमस्कारं चकार । स्वागतसत्कारस्य कथाः कथनातीताः वृत्तपत्रेषु प्रसिद्धिं गताः । पण्डितः नेहरुः तु राजनीतेः महान् अद्वितीय आचार्यः इति अमेरिका-निवासिभिः सर्वत्र प्रशंसितः । एवं भारतीयो महामात्यः तत्र सत्कारितः सर्वत्र प्रशंसितः च ।

'वैदिकधर्म' मासपत्रादुद्धृतोऽयं लेखः ।

श्री राष्ट्रभाषाप्रार्थना

अंब श्रीसुरभारति ! प्रविततेराष्ट्रे निजे भारते ।
डेड् ल्यांग्वेजिति मानिता, नहि तदा श्रीराष्ट्रभाषेति वै ॥
पुत्रे शासति राजसे नहि कथं सद्यः स्वराज्ये तथा ।
हिंदुस्थानपदे स्वराज्यविभवे को वा विरोधी तव ॥१॥

अंब त्वं प्रभुतां गतासि महतीं शार्मण्यदेशे सदा ।
काबूलेऽपि तथा पृथग्विजयसे पाश्चात्यराष्ट्रेषु च ॥
अन्यत्रापि सुगीतया प्रथितया ज्ञातासि विद्वज्जनैः ।
आभासार्थमिहापि राजपुरुषैः संमानितासि क्वचित् ॥२॥

बालाचार्यः मंगळवेदी, हुबळी ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विकसति हृदयाब्जं ज्ञानसूर्येण नित्यम् ।

(श्रीमद्भिः पण्डितैः भीमाजी जीवाजी हुलिकवि,
बी. ए., एस्. टी. सी., इत्येतैः कविभिर्विरचितम् ।)

परिमलपरिपूर्णं पुष्पगन्धं विगन्धं
किसलयचयरम्यः शुष्कतामेति वृक्षः ॥
शशिरविकरकान्तिः स्फायते व्येति पश्चाद्
विकसति हृदयाब्जं ज्ञानसूर्येण नित्यम् ॥१॥

मधुमधुरसुकण्ठः कोकिलस्यैति मौनं
ललितलुलितनृत्यं त्यज्यते बर्हिसङ्घैः ॥
चलति च ललितत्वं कालचक्रेण सृष्टेः
विकसति हृदयाब्जं ज्ञानसूर्येण नित्यम् ॥२॥

अवयवसुभगत्वं शैशवे श्लाघ्यमानं
तदपि च कमनीयं यौवने भिन्नरूपम् ॥
खिलमखिलमदृश्यं वापि वार्धक्यकाले
विकसति हृदयाब्जं ज्ञानसूर्येण नित्यम् ॥३॥

सुतवदनविलोके मातृचित्तं प्रसन्नं
युवतिरपि च कान्तप्रेक्षणाद्धर्षपूर्णा ॥
भवति तु सुखमीदङ्नश्वरं न स्थिरं तद्
विकसति हृदयाब्जं ज्ञानसूर्येण नित्यम् ॥४॥

सति दिनपति बिम्बस्योदयेऽम्भोजहासः
स्फुटति कुमुदकोशः कौमुदीशप्रकाशे ॥
इह न हि सुविलासस्त्वेतयोः सर्वकाले
विकसति हृदयाब्जं ज्ञानसूर्येण नित्यम् ॥५॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अहिमहिमकराभ्यां वर्धते वार्धितोयं
स किल सलिलराशिः क्षीयते वर्धितोऽपि ॥
स्थिरगुणचिरशोभी कोऽपि नैवास्ति भावः
विकसति हृदयाब्जं ज्ञानसूर्येण नित्यम् ॥६॥

अहो अपहृतं भारतप्रजाप्राणसारसर्वस्वम्।

"वाग्जन्मवैफल्यमसह्यशल्यं गुणाद्भुते वस्तुनि मौनिता चेत्" इत्यनेन विद्वदौषधे नैषधीयकाव्ये कविताकामिनीहर्षः श्रीहर्षः गुणाद्भुत-वस्तुवर्णन एव साफल्यं वाग्जन्मन इत्यभिप्रैति। अन्यथा निरर्थकैव सारस्वतसृष्टिः निष्फलैव कवनकलाकौशली निष्प्रयोजनं च सुधियां शब्दाब्धिलब्धवैदग्ध्यम्। अस्मिंश्च विंशतिशतमाने विश्वविश्वंभरावासिमानवकुलकोटिवंदनीयपदार-विन्दद्वंद्वं त्रयश्चत्वारिंशत्कोटिभारतीय (पाकिस्तानीयान्विहाय) प्रजावृन्दारक-वृन्दवंद्यवृन्दारकपुरंदरं सत्याहिंसादयाधैर्यशौर्यौदार्यगांभीर्यचातुर्यसौजन्य-सौशील्यसौहार्दसौमनस्यादिनैकगुणगणबन्धुरं यशश्चंद्रचंद्रिकाधवलितसमस्त वसुन्धरं राजकारणधुरंधरं महात्मेत्यर्थविशेषणविशेषविख्यातं श्रीगान्धीमहोदय-मन्तरा किमन्यत् गुणाद्भुतं वस्तु चिरादन्विष्यापि समुपलब्धुं शक्यते यस्य खलु समुपवर्णनेन कविवाणी चारुचारितार्थ्यं साफल्यं चानुविन्देत। सार्थकी-भवेच्च वागर्थसंसारः।

अत एव खल्वद्यतनस्य समस्ताक्षरप्रपञ्चस्यैव स एकमात्रलक्ष्यतां भजते। स खल्वद्य गद्येषु प्रतिपाद्यते श्लोकैरुपश्लोक्यते निबन्धेषु उपनिबध्यते नाटकेषु नायकीक्रियते। सः सुरासुरसंहारकर्तापि कादंबरीपात्रं गृह्णाति किंबहुना अयमद्य राकारजनीकान्त इव समग्रसारस्वतसृष्टिमेवाभिद्योतयति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अभिवर्धयति च। तमेनं नायकरत्नमासाद्य नायकान्तरान्वेषणकर्मणि खंजीभवति कविकल्पना। अन्धीभवति च रवेरप्य गोचराण्यपि वस्तूनि साक्षात्कुर्वन्ती कविदृष्टिः महात्मेतरनायकोत्तमान्वेषणे। न चायं मितमतिनां कवीनामपराधः परममितानां तदीयगुणानामेव।

यथोक्तं जयदेवेन—

"स्वसूक्तीनां पात्रं रघुतिलक मेनं (क्षितितिलक गांधिं) कलयतां।"
कवीनां को दोषः स तदमितगुणानामवगुणः।

वन, वनज, वनजाक्षी, भवन, भुवन, पवनोपवन, पावन, नद, नदी, नीरद, नीरधि, नभो, नग, नाग, सुररूप्यसुर नीहारकर, हार, भाराद्यसारपदार्थसार्थवर्णनव्यसनिनः कविपुङ्गवाः ईदृशमपूर्वं विपश्चिदपश्चिममनुत्तरं कदाप्यदक्षिणम् नित्यसत्यसदनं दयोदयस्थानं अहिंसावतंस प्रशंसनीयं शमविश्रामभूमिं दमधामानं अक्षामक्षमाक्षयनिधिमहीयसा अनेहसा महात्मेति महीमंडले महामहिम्नामहितं श्रीमोहनदासगांधीमहोदयं विहाय किं कुतो वान्यं सामान्यं व्यक्तिविशेषं स्वकाव्यवधूवरत्वेन वृणुयुः। "स्थितेऽरविन्दे मकरंदनिर्भरे मधुव्रतो नेक्षुरसं समीक्षते"।

सत्यमद्य मित्रेणेव वृत्रासुरस्य बन्धुनेव जरासंधस्य प्रतिबिंबेनेव हिडिंबस्य प्रियसखेनेव बकासुरस्य डिंभेनेव कुंभकर्णस्य भृत्येनेव मृत्युदेवतायाः क्रौर्यमूर्तिना प्रसृतापकीर्तिना गोडसेनथूरामेण महात्मनः हत्या न कृता यतः "विनाशमव्ययस्यास्य न कश्चित् कर्तुमर्हति"। परं तेन नथूरामराहुणा मारितः परच्छन्दानुवर्ती (दक्षिणः सरलोदारे परच्छन्दानुवर्तिनि) भारतसौभाग्यभास्करः उच्छिन्नमार्यहिंदमातुः कण्टमङ्गलसूत्रम्। अपहृतं भारतवासिनैककोटिप्रजाजनप्राणसारसर्वस्वम्।

"करुणाविमुखेन मृत्युना हरता तं वद किं न नो हृतम्?"
नूनममुं समग्रभारतवर्षस्य एकमात्रं नायकमपहृतवता दुष्टनष्टदयाभ्रष्टात्मना यमेन

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

किं वा नापहृतं भारतीयानाम्, । अद्य मृतः एकः भारतवर्षस्य राजकारण-धुरंधरः हृतः एकः सर्वत्यागीयोगीश्वरः हृतः एकः समाजसुधारकः गत एकः गीतोक्तप्रमेयप्रतिपादनानुष्ठानकर्ता दूरीभूतः दीनदलितदरिद्रदुःखितजनतो-द्धारकः विश्वबंधुः अंतर्हितः विश्वशांतिप्रस्थापकः विहिंसितः अहिंसातत्वस्य एकमात्रपुरस्कर्ता तिरोहितः प्राच्यप्रतीच्यसंस्कृतिसमन्वयसाधकः । सत्यमेव जगति न कस्यापि राष्ट्रस्य जनांगस्य वा एतादृशासदृशासंख्येयगौरवगरिम द्योतनचणगुणगणमणिखणीभूताभूतपूर्वनेत्रलाभसौभाग्यैभागित्वं भारतभिन्नस्य आसीदस्ति वा ।

"जितो दुर्गः परं हतः सिंहः ।"

अतिदुर्गमं सिंहगडदुर्गं वशीकृत्य धारातीर्थे पतिते मृते च तानाजीवीरे श्रीशिवछत्रपतिः (गड आला पण सिंह गेला) दुर्गं आगतः परं सिंहस्तु संहत इति निराशो निश्वासपूर्वं दुःखोद्गारमाविश्चकार । अद्य भारत-मात्राऽपि तथैव "जितं सिंहासनं परं हतः सिंहः" इति बाष्पगद्गदं दुःखो-द्गार आविष्क्रियते । येनहि महात्मना विश्वप्रयत्नेन भगीरथसाहसेन दीर्घतप-स्यया नितान्तसहिष्णुतया अनवसीयमानधृत्या सर्वस्वत्यागेन आत्मदलिदानेन च संपादितं विनिर्मितं च सर्वतंत्रस्वतंत्रस्वराज्यमन्दिरं तत्र तस्य महात्मन एकवर्षमप्युषितुं विधिरवकाशं नाकल्पयदिति चेखिद्यते चेतः ।

येन हि महात्मना एकाकिनाऽपि असहायेनापि निःशस्त्रेणापि जना-ढ्यस्य धनाढ्यबलाढ्यस्य गर्वान्धस्य कपिमुष्टेः लोहपाणेः पाषाणप्रकृतेः वज्रहृदयस्य कृतान्तक्रूरस्य ब्रिटीशसाम्राज्यस्य विरुद्धं प्राणान् पणीकृत्य सर्वस्वमपि तृणीकृत्य त्रिंशद्वर्षानविच्छिन्नमनलसं सधैर्यशौर्यस्थैर्यचातुर्यं च नियुज्य या भारतमाता पारतन्त्र्यपंजरादुन्मोचिता दीर्घदास्यदुर्द्दमकर्दमाच्च समुद्धृता तस्या एव मुक्तमातुः पुरस्तात् तस्यैव स्वमुक्तिकारणीभूतस्य स्वोद्धा-रार्थं हुतसर्वस्वस्य कृतात्मार्पणस्य प्रियपुत्ररत्नस्य ईदृशमानुषहननं कियद्वामातृ-हृदयस्य दुःखं समुत्पादयेत् कियतीं वा वेदनापरंपरामेव नोद्भावयेत् ? ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

"किं मे राज्येन !!!!!! किं भोगैः जीवितेन वा !"

का वा माताऽत्र जगति पुत्रमरणानंतरं प्राप्तेन तदीय जीवविमा द्रव्येन प्रभूतेनापि कोट्यधिकेनापि परितृप्यति। का च प्रसवित्री तेन प्रभूतैश्वर्येण भोगान् भोक्तुं सन्नह्येत्। तथैवाद्य भारतमातापि अनिर्वचनीयागाधदुःखगद्गदितकण्ठमुद्गिरति गते हते मृते वा मम आनन्दग्रन्थौ पुत्ररत्ने गांधिनि किं स्वराज्येन किं सुराज्येन किं भोगैः किं वा सुखकणिकालाभाशालेशलोपेन क्लेशैकभाजनेन जीवनेन अथवा जीवन्मरणेन वा मम इति। वंध्यामेव चाकलयमि चत्वारिंशत्कोटिकृत्वः प्रसूतिवेदनामनुभूतवंतमप्यात्मानम्। यतोहि "कामं सुताः संतु च कोटिशोऽन्ये तां पुत्रिणीमाहुरनेन भूमिम्"। अनेनैव च नायकरत्नेन रत्नगर्भेति आत्मनो नाम सार्थकमवैति स्म सा वसुंधरा। परमद्य महात्मनः स्वर्गनिर्गमनानन्तरं पाषाणगर्भेति शिलासूरिति च कुनामभिस्संबुध्यमाना सर्वंसहा न सहते पुत्रवियोगं क्षमापि न क्षमते प्रियपुत्रस्य दुरन्तजनितदुःखप्राग्भारं स्थिरापि अचलापि कंपते दारुणकर्म विलोक्य। काष्ठा अपि क्लेशस्य परामेव काष्ठामुपगताः

"हतविधिलसितानां ही विचित्रो विपाकः"

यः महात्मा अहिंसातत्त्वोपदेशमेव आत्मनः जीवनस्य प्रधानोद्देशं मेने न केवलमुपदेशमेवाकरोत् परंतु राजकारणसदृशहिंसैकजीवातुभूतक्षेत्रेऽपि अहिंसाप्रयोगं कृत्वा यशः संपादितवान्, "अहिंसा परमोधर्मः" इत्येव यस्य जीवनमन्त्रः "मा हिंस्यात्सर्वभूतानि" इत्येव यस्य नेत्रसूत्रं "शांतिः शांतिः शांतिः" इति नवयुगीन शांतिसूक्तस्य यः खल्वाद्यद्रष्टा यस्य शांतिनोबेल् पारितोषकं प्रदेयमित्यपि निर्धारितमासीत् तस्य खलु शांतमूर्तेः अहिंसाप्राणस्य गांधिनः ईदृशं दुरंतविहिंसनं कस्य वा मनसि साश्चर्यमुद्वेगं न जनयेत् ?।

तदपि च "क्विट इंडिया" भारतादपसर्पतु इति निर्णयमङ्गीकृत्य येषां

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

भूतोच्चाटनं विहितं तैः ब्रिटिशाधिकारिभिरन्यैर्वा नानुष्ठितम् । परंतु स्वजीवन-सर्वस्वमपि व्ययीकृत्य यस्याः पारतन्त्र्यपंकाद्दुद्धारः सुसाधितः तस्यामेव हिन्दू-जात्यां समुत्पन्नेन पुरुषाधमेन तस्य पुरुषोत्तमस्य मकरेणेव सलिलादुत्तारयितुः व्याघ्रेणेव पंजरादुन्मोचयितुः प्राणाः प्रणाशिताः कृतघ्नेन क्रव्यादाकृतिना कृतांतकृतिना नितांतक्रूरेण हतात्मनेति अवनमंति लज्जया चत्वारिंशत्कोटि-शिरांसि अशीतिकोटिनेत्रसंपुटेभ्योऽजस्रं प्रसवन् बाष्पजलधारापूरप्रवाहः अपराण्येव सप्तसमुद्राणि विरचयति च । महानेवायं कलंकः हिंदूजातेरेव किंबहुना मानवजनाङ्कस्यैव । महदिदं लांछनमेव भारतभूदेवीभालपट्टे यदा चंद्रतारं न विनश्येत् । महदिदमपमानास्पदं प्रगतिपथे परामेव पुरोगतिमश्नु-वामीति अभिमन्यमानायाः मानवीयसंस्कृतेः नवनागरिकतायाश्च । अनेन खलु एतदेव सिध्यति यत् अद्यापि भूमंडले मानवप्राणिनः विभूतिसाजात्यसौभा-ग्यं साहचर्यसौफल्यं समानकालिकत्वसंमानं चाधिगंतुमनर्हतमा इति । अत एव खलु "संभवामि युगे युगे" इति प्रतिजानन्नपि एतच्छतके समुत्पन्नानां नरपशूनामयोग्यतामनुलक्ष्यैव त्रियुगभूतिरिदानीं नावतरति महीमण्डलम् । महात्मनो, दुरन्तमरणोदंत श्रवणाव्यवहितोत्तरक्षण एव दिगंतविश्रांतनिशाकांत कांतकीर्तिशालिना विश्वविश्रुतवरकवीन्द्रेण सारस्वत प्रपंचप्रजापतिवसुंधरा वलयवास्तोष्पतिना श्री जॉर्जबर्नाड षा महाशयेन This is unwise to be too good to the world. "अतीवहितकारित्वं जगतो मौर्ख्यमेव हि" इति यः दुःखोद्गार आविष्कृतः तस्य याथार्थ्यं क्रिस्त सॉक्रेटीस अब्राहम लिंकन् महात्मादि महाव्यक्तीनां दुरन्तकथामनुशीलयतः सामस्त्येन प्रतीयते । एतादृशाः महामहिमशालिनः महात्मानः महीमंडलमिदं यदाकदाचिदेव मंडयंति द्वित्रिसहस्रवर्षेषु । भगवतो बुद्धादनंतरं द्विसहस्रवर्षांते एतादृशं गांधीसदृशं असदृशं नूनं विभूतिरत्नं कृच्छ्रादसूत सार्थकं चाकरोत् स्वकीयं रत्नगर्भेति नाम वसुंधरा देवी ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

" विंशतिशतमानस्य अभूतपूर्वः विभूतिपुरुषः "

वस्तुतो विचार्यमाणे क्रिस्तबुद्धसाक्रेटीसरामकृष्णाद्यपेक्षया अयं विंशति शतकविभूतिपुरुषः वरीयान् वरिवस्यार्हः गुणतो गरीयान् योग्यतया ज्यायान् महिम्ना महीयांश्चेति प्रज्ञादृशामभिप्रायः। यतोहि क्रिस्तबुद्धरामकृष्णादि-महापुरुषैः केवलं धार्मिकक्षेत्र एव विलक्षणा क्रांतिः समुत्पादिता। अत एव खलु ते सत्पुरुषाः विभूतयः इति च जनैः अभिधीयंते अभिष्टूयंते अभिनंद्यंते अभिवंद्यंते च। परमद्यतनयुगपुरुषेण महात्मना न केवलं धार्मिकक्षेत्रे परंतु राजकीयक्षेत्रे तथा बौद्धिक नैतिक सामाजिक सांकृतिक साहित्यक शैक्षणिका-र्थिक क्षेत्रेषु अपि अनन्यसाधारणीं क्रांतिं समुत्पाद्य अन्यादृशमेव विभूतिमत्वं प्रख्यापितम्। अनेन खलु विंशतिशतमानस्य विश्वविलक्षणविभूतिवरेण्येन निसर्गभिन्नास्पदयोरपि धर्मराजकारणयोः परस्परसमन्वयः साधितः। हिंसैक-जीवातुभूतं प्रतारणैकप्रधानं क्रौर्याधिष्ठितं राजकीयकुरुक्षेत्रमपि स्वप्रभावेन धर्मक्षेत्रमेवाकरोत् अयं धर्मात्मा महात्मा। हिंसाक्रौर्यकौटिल्यवञ्चनघातपात-पातकादिस्थाने सत्याहिंसादयाशमदमतितिक्षाप्रेमसौहार्दादिसौदर्योदारभावानापूर्य रक्तरंजितमपिराजकारणं योगभोगत्यागात्मार्पणवैराग्यादिसंपन्नतपस्विजनानु-ष्ठेयमाश्रयधर्ममेवाकरोत्। एतादृशधर्मत्रर्मसुदृढराजकीयतत्त्वानां न केवलमव्य-वहार्योपदेश एव विहितः परंतु भारतसदृशस्य शतकानुशतकं पारतन्त्र्यपङ्के विलुठ्य विगतप्रत्युत्थानाशस्य राष्ट्रस्य तेनैव स्वाविष्कृतेन गृहीतधर्मदीक्षा-दक्षतपस्विराजकारणेनैव स्वाराज्यं संपादयित्वा सत्याऽहिंसाप्रधानतपस्वि-राजकारणस्य प्रयोगसिद्धयशस्वितां व्यावहारिकतां च प्रस्थापयामास।

अहो अवटितघटनापटीयस्त्वं महात्मनः। महात्मता नाम न खलु सर्वसाधारणकर्माचरणे न लभ्या। परंतु कोट्यधिकैः शताधिकवर्षपर्यंतं प्रयत्यापि यत्कर्तुं न पार्यते कथंकारमपि तथाविधं सर्वजनदुष्करं कार्यमल्पी-यस्येवावधौ यः लीलामात्रेणैव साध्नोति यश्च तदमृतफलमपि प्राप्नोति स एव

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

हि महात्मा युगपुरुषः अवतारी पुरुष इति चाभिधीयते उपगीयते संस्तूयते संप्रीयते आद्रियते प्रशस्यते पूज्यते पर्युपास्यते च निरंतरं प्रजाजनैः। भगवान् श्रीरामचंद्रः वानरानेव साहाय्यार्थे गृहीत्वा त्रिभुवनतलार्जिक्यमपि लंकाधीशं निरंकुशमपि तं कालसंकाशमपि यंकमपि शंकुमिव संहत्य प्रपंच-मातरं बंधनादुन्मोचयामास। वस्तुतो विचार्यमाणे रावणः जगज्जेता अपरि-मितसैन्यबलिष्ठः। तस्य निवासोपि दुष्प्रवेशे ब्रह्मणाऽपि दुर्लंघ्ये अभेद्य दुर्गमदुर्गे लंकापत्तने। श्रीमान् महात्मा रामस्तु इतः निस्सहायः परिवारवर्गः मर्कटा एव। तथापि एतादृशपरिस्थित्यां सत्यामपि धैर्येण आत्मविश्वासेन अंतःसत्वेन च प्रणुन्नुः श्रीरामः यत्समुद्रमभात्सीत् लंका च यदरौत्सीत् राक्षसांश्च यदभै-त्सीत् निशाचरगर्वसर्वस्वमपि यदभांक्षीत् रावणकुंभकर्णादीनपि यदतीतृहत् सीतां च यदुददीधरत् तत्सर्वमपि रामस्य महात्मताया एव प्रभावः। राजकीय-क्षितिजांगणे श्रीगांधिनः पदार्पणात् प्राक् भारतस्यापि तथाविधा एव ह्यासीत् शोचनीया दयनीया च परिस्थितिः।

"क्रियासिद्धिः सत्वे भवति महतां नोपकरणे"

जगत्येवार्जिक्या इतिप्रसिद्धा आंग्लपूर्वदेवा श्रीरामकलत्रमिव भारतस्वातन्त्र्य-मपहृत्य अपारपयःपारावारपरिवेष्टितायां लंकायामिव लण्डननगर्यां स्थित्वा भारतमातरं सदाशोकच्छायायामेव स्थापयामासुः। समुद्रनाथाभिरक्षितत्वात् तस्यांग्लद्वीपस्य दुष्कर एव तदभियोगः। शताधिकवर्षेभ्यः शस्त्रास्त्रदर्शन-वैधुर्येण क्षीणशक्तयः विस्मृतयुद्धकलाः समूलविनष्टरणकथासंस्काराः भारतीयाः सर्वा अपि प्रकृतयः प्रकृतित एव तृतीयाप्रकृतयः आसन्। एवं च एतादृश्यां नैराश्यमयपरिस्थित्यां नासीदेव भारतवर्षस्य पुनरभ्युत्थानोदयो-द्धारकल्पनापि कस्यचिदपि। तस्मिंश्च तथाविधे निष्प्रतिविधेये प्रसंगे श्रीराम

१ २ ३ ४

इव विलसल्लक्ष्मणान्वितः जनकानंदकारी खरदूषणनाशकर्ता सारस्वतप्रबंध-

---

१ लक्ष्मणेन लक्षणेन च। २ पिता जनकश्च। ३ तन्नामकराक्षसौ प्रबलदोषश्च।
४ समुद्रसेतुबंधः वाङ्मयप्रबन्धस्य

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इत्येवमाभाष्य मिताभिभाषी सत्यव्रतो मौनमुपागमत्सः ।
मोमुद्यमाना च सभा सुराज्ञे स्वस्त्यस्त्विति प्रेमभराच्छशंस ॥ ७६ ॥

अथ स सुचरितानामग्रणीर्मुक्तसभ्यः
सपदि गदितुकामः प्रेयसीभ्यस्सुवार्ताम् ।
निजभवनमनल्पश्रीविलासं महीन्द्रो-
गजपतिरिव यूथाद्गह्वरं चाविवेश ॥ ७७ ॥

इति श्रीसतीविलासमहाकाव्ये
श्रीकृष्णमूर्तिकविकृते
प्रथमस्सर्गः
ॐ
तत्सत् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीः

श्रीसतीविलासमहाकाव्ये

द्वितीयस्सर्गः

अथ भूमिभृदग्रणीर्दधानो मनसि प्रत्यहमम्बिकावितीर्णम् ।
वरमात्तकुतूहलस्स्वराज्यं प्रशशासेन्द्र इवामरावतीं सः ॥ १ ॥

अतिवाहय कानिचिद्दिनानि क्षममाणस्य हि हीयते न किञ्चित् ।
कमलासनकामिनीवचस्तन्न मृषा स्यादिति सान्त्वयन्स्वदारान् ॥ २ ॥

महिषी नृपतेश्च सच्चरित्रा विधिवत्प्रत्यहमर्चितुं प्रवृत्ता ।
परमेशविलासिनीं, जगत्या जननीं कामितदानकल्पवल्लीम् ॥ ३ ॥

नृपयोषिदुवाह विश्वमातुः कृपया दौर्हृदलक्षणं मनोज्ञम् ।
विफलानि भवन्ति जातुचिन्नो जगदम्बापदपङ्कजार्हणानि ॥ ४ ॥

नवलोध्रमणीचकस्य लक्ष्मीं मुखमस्याः परिपाण्डुरञ्जहास ।
समुदैक्षत तत्र मध्ययष्टिर्विदयदौपम्यनिराचिकीर्षयेव ॥ ५ ॥
(मणीचकःप्रसूनम्)

पृथुगौरपयोधरस्तरुण्या उपमीयेत च तेन चूचुकाग्रः ।
यदि नीलसरोजमण्डिताग्रः परिदृश्येत पयःपयोधिभङ्गः ॥ ६ ॥
(भङ्गः + तरङ्गः)

क्रमशश्शिथिलीचकार वाञ्छां नवरत्नाभरणेषु गर्भखिन्ना ।
प्रथमेयमवस्थितिर्वराङ्ग्यास्सकलाङ्गेषु मनोज्ञतां पुपोष ॥ ७ ॥

स च यद्यदभीप्सितं प्रियाया अविलम्बेन दिशंस्तदिङ्गितज्ञः ।
नृपतिः परिपीय लोचनाभ्यामसकृन्नैव ततर्प गर्भपूर्णाम् ॥ ८ ॥

अथ पुंसवनादिकृत्यजातं विधिवच्छ्रोत्रियसन्निधौ प्रमोदात् ।
क्षितिपोऽर्पितकामधुग्व्यतानीद्धनदान्सर्ववनीपकांस्तदानीम् ॥ ९ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दिवसेषु गतेषु केषुचित्तन्महिषी संसुषुवे शुभे मुहूर्ते ।
विमलां कमलामिवोल्लसन्तीं तनयां काञ्चन काञ्चनाङ्गवल्लीम् ॥ १० ॥

किमियं द्युमणेर्नु दीधितिस्स्यादुत विद्युल्लतिका कला स्विदिन्दोः ।
इति वामविलोचनासमूहः समदिग्धोद्भवकाल एव तस्याः ॥ ११ ॥

शशिशेखरसुभ्रुवः कला वा कमलाया नु कला कला नु वाण्याः ।
इति सन्दिदिहुस्समीक्ष्य जातां निरणैषुर्न जनाः कथञ्चिदन्ते ॥ १२ ॥

विनिवेद्य सुधाझरीसगोत्रां शुभवार्तां परिषद्गताय राज्ञे ।
काति वा ललना न लेभिरेऽस्मान्नृपतेरुत्तमपारितोषिकाणि ॥ १३ ॥

अमितानि वसूनि हस्तिनोऽश्वान्नवधान्यानि पयस्विनीरसङ्ख्याः ।
विततार मनस्विनां वरोऽसाववनीन्द्रोऽवनिदेवतल्लजेभ्यः ॥ १४ ॥

पारितो हरितःप्रसेदुरासीद्विमलं खं, त्रिगुणा ववुस्समीराः ।
जल्मच्छमभूत्प्रदक्षिणार्चिर्हविरादत्त धनञ्जयस्तदानीम् ॥ १५ ॥

भुवनेऽस्वपतेर्महिष्यसावीत्तनयां श्रीजगदम्बिकांशभूताम् ।
इति नारदतो निशम्य वाचं त्रिदिवेशा जहृषुर्भृशं सदाराः ॥ १६ ॥

मुदिता ववृषुस्स्रवन्मधूनि त्रिदशाः कल्पसुमानि मञ्जुलानि ।
ननृतुस्सुरवारवामनेत्रा वरगन्धर्वगणा जगुर्मनोज्ञम् ॥ १७ ॥

हसतीप्साति गायाति प्रहृष्यत्यताति भ्राम्याति नृत्याति स्तवीति ।
जनता जननोत्सवे कुमार्या महति, क्षोणिभृतोऽस्य राजधान्याम् ॥ १८ ॥

अचलेन्द्रसगोत्रवारणेन्द्रैः पवनस्यापि निकारमावहद्भिः ।
तुरगैर्निशितायुधैः प्रवीरैर्जटिलाभूदखिलापि राजवीथी ॥ १९ ॥

अथ भूदिविषद्भिरात्मविद्भिस्सह संमन्त्र्य सभामुपेयिवद्भिः ।
नृपतिर्विनयोज्ज्वलः कुमार्यै स च सावित्र्यभिधां ददौ यथार्थाम् ॥ २० ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नृपमन्दिरसुन्दरीजनेन स्पृहणीयाखिलमोहनौषधिस्सा ।
समवर्धत शुक्लपक्षचन्द्रप्रभयौपम्यमुपेयुषी क्रमेण ॥ २१ ॥

मुखपङ्कजनिर्गते स्मिते वा रुदिते वा ऽनियमेन जायमाने ।
समलक्ष्यत रामणीयकं तत्सममेव क्षितिवल्लभात्मजायाः ॥ २२ ॥

रुचिरैरचिरोद्गमैश्च दन्तैर्नवमल्लीमुकुलश्रियं हसद्भिः ।
जनितं स्मितमेकमेव तस्या जगतीमोहनहेतुरित्यमानि ॥ २३ ॥

निजमातुरिमां ग्रहीतुकामाः करपद्मं प्रथमं प्रसार्य, पश्चात् ।
अनया परिवञ्चिताश्च काश्चित्कतिचित्प्राप्तमनोरथा बभूवुः ॥ २४ ॥

स्खलितं यदभूद्वचस्सु तस्याः तदपि प्रीतिमजीजनज्जनानाम् ।
यदियं बहुधापि शिक्ष्यमाणा न जहावस्फुटतां मनोज्ञवाण्याम् ॥ २५ ॥

विधुमाप्तुमनाः कदाचिदेषा करपद्मं समुदस्य रोदिति स्म ।
स्वकरार्पितदर्पणेऽथ दृष्ट्वा मुखमात्मीयमहो समाधिमाप ॥ २६ ॥

यदि किञ्चिदभीप्सितं विभायादितरस्मात्तदगृह्णत स्मितेन ।
मम देहि तदित्युदीर्यमाणा सहसा साच्यकरोन्मुखारविन्दम् ॥ २७ ॥

मणिकुट्टिमबिम्बिता जनन्याः प्रतिमा मोहकरीर्विहाय सद्यः ।
अवबुध्य च मातरं ययौ सा निजसंविद्विषयेण लक्ष्णेन ॥ २८ ॥

शिशुभिस्सह वासरावसाने विहरन्तीं परिधूसरां मृदा ताम् ।
परिमृज्य बलाद्गृहं निनीषुः प्रमदायासमतीव कापि लेभे ॥ २९ ॥

अविभेन्न नृपात्मजा कुतश्चिच्छिशुरप्यत्र न चित्रमस्ति किञ्चित् ।
यददो हृदयाम्बुजन्मरङ्गस्थलमाश्रित्य ननर्त धैर्यलक्ष्मीः ॥ ३० ॥

अतनिष्ठ यथेष्टमष्टमाब्दे स्वमतिं सर्वकलास्वसौ सुतीक्ष्णाम् ।
विदुषी धिषणं जयेदयत्नादिति सर्वैर्ध्रुवमभ्यमन्यतापि ॥ ३१ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

असकृत्परिशीलनाद्वयस्यीकुरुते स्म स्वमतेस्समस्तविद्याः ।
विमला प्रतिभा तया स्वकीया विदुषां संसदि विन्ययुज्यतैव ॥ ३२ ॥

क च मे मधुरस्वरः क्व हेयं रणितं तेऽद्य तथापि मा व्यथां गाः ।
इति सा परिमृज्य वल्लकीं स्वामससान्त्वत्परिवादनच्छलेन ॥ ३३ ॥

वयसि प्रथमेऽपि वर्तमाना न च तत्वार्थमुवाच राजपुत्री ।
स्वयमेव, विपश्चिदुत्तमेभ्यो न शमी वह्निमलोडिताददीत ॥ ३४ ॥

अतिथीनखिलानुपाचरत्सा समरक्षत्प्रतिवासरञ्च दीनान् ।
अवबुध्य तथा चचार पित्रोर्वरिवस्याऽखिलभाग्यदायिनीति ॥ ३५ ॥

अथ मन्मथराजसख्यवस्था स्पृहणीयाऽवनिवासवात्मजायाः ।
वपुषि स्वयमाप्तुमाधिपत्यं गतकल्पां शिशुतां व्यपानिनीषत् ॥ ३६ ॥

अलकेन विधुन्तुदं मुखेन द्विजराजं निजपाणिनारुणाब्जम् ।
नयनेन सितेतराब्जमूरुद्वितयेनाथ जिगाय सापि रम्भाम् ॥ ३७ ॥

शरपाण्डरगण्डपत्रभङ्गीं शफरीसन्निभलोचनाभिरामाम् ।
जितबालमृणालबाहुवल्लीमसृजत्तामचिरत्न एव धाता ॥ ३८ ॥

युवनेत्रचकोरचन्द्रिका वा विमलस्फाटिकसालभञ्जिका वा ।
नयनामृतवर्तिकाथवेयं त्रिजगन्मोहमहौषधिर्भवेद्वा ॥ ३९ ॥

चिकुरप्रकरैर्जितश्चलाक्ष्याः पुरतः स्थातुमशक्नुवन्ह्रियाऽस्याः ।
किमु पृष्ठमवाप धावितुं द्राग्जवयुक्तस्य मृगस्य चामरोऽपि ॥ ४० ॥

वियता सदृशं चलं दुकूलं तदुरोजद्वयगोपनासमर्थम् ।
धरणीधरशृङ्गपातिशुभ्रस्तनयित्नोर्विहृतिश्रियं जहास ॥ ४१ ॥

उपमानपदात्परिच्युतास्याः त्रिकुरं वीक्ष्य च भृङ्गराजिरब्जम् ।
अधुनाप्यभिहन्त्यहर्मुखे "त्वं त्यज तन्नेत्रसमभ्रमं" न्वितीव ॥ ४२ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अलकेषु च वक्रिमा न वाण्यां काठिनत्वञ्च कुचे न मानसेऽत्याः ।
क्रमणेऽलसता न शास्त्रजाले परिहासस्त्वसखीजने न सत्सु ॥ ४३ ॥

विधुमण्डलतोऽग्रहीद्विधाता निखिलं सारमदो मुखं सिसृक्षन् ।
लघुभूतमतः प्रभञ्जनेनोत्पतितं सद्दिवि सञ्चलद्विभाति ॥ ४४ ॥

वयसार्जितमन्वहं स्वसख्या बहुलावण्यधनं वपुष्यमुष्याः ।
कुचकाञ्चनकुम्भयोस्स कृत्वा जतुमुद्रामुपरि स्मरो नु तेने ॥ ४५ ॥

कुसुमायुधतन्त्रतत्वसारं स युवभ्यस्समुपादिदिक्षदस्याः ।
सुदृशोऽमृतवर्षशीतलो यः श्रुतिविश्रान्तदृगञ्चलस्य पातः ॥ ४६ ॥

अदयो हृदयं समस्तयूनां शिथिलीकर्तुमना इवातिमात्रम् ।
मदनः कवरीभरेषु तस्या निजबाणं किमतिष्ठिपत्तुरीयम् ॥ ४७ ॥

निजपञ्चममार्गणौ धनुर्भ्यां सह संयोज्य मुमुक्षति स्मरो नु ।
इति को बुबुधे न तादृगक्षिभ्रुवसंस्थानमुदीक्ष्य पक्ष्मलाक्ष्याः ॥ ४८ ॥

पुलिनस्थलरूढपीनरम्भायुगलं वर्धयितुं गभीरकूपम् ।
अणुवर्त्म च तस्य कुम्भयुग्मं वपुरुद्यानवनेऽसृजत्स्मरोऽस्याः ॥ ४९ ॥

रदनैरधरीकृतानि तन्व्याः नवमल्लीमुकुलानि लज्जितानि ।
न जहत्यधुनापि हि ध्रुवं स्त्री कवरीभारमहान्धकारवासम् ॥ ५० ॥

सुदतीरदनादभाजि सर्वं विमलं मौक्तिकमित्यवेत्य खेदात् ।
उदधिर्ह्नुत एव तद्धि शुक्तावपि हेये रमतेऽखिलस्त्वकीये ॥ ५१ ॥
(अभाजि + भङ्गं प्राप्तम्)

यदि विद्रुमशुक्तिका प्रसिद्धचेन्नवमुक्ताफलमुज्ज्वलेत्तदन्तः ।
अरुणाधरबिम्बसंपुटान्तस्मितमस्या बिभृतां तदीयलक्ष्मीम् ॥ ५२ ॥

मुखमाब्जदशैवलञ्च केशो जघनञ्चापुलिनद्वगप्यमीनत् ।
ह्रदाति स्म गभीरनाभिरित्थं तरुणी कापि तरङ्गिणीव रेजे ॥ ५३ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

युवनेत्रझषान्प्रभाझरेऽस्या विनिपत्यामिततृष्णया चरिष्णून् ।
वडिशैस्स्मरधीवरस्तदङ्गैर्गुणबन्धेन च हारिभिश्चकर्ष ॥ ५४ ॥

उपरि स्तनशैलयोर्गुरुत्वाज्जघनस्याप्यतिगौरवादधस्तात् ।
वत सूक्ष्मतरं तदीयमध्यं किमु सन्दंशगतं विनष्टमासीत् ॥ ५५ ॥

अतिचञ्चलचारुचेलकान्तः कनकाभस्सुखदर्शनस्तदूरुः ।
सपताकमनङ्गजैत्रयात्राविजयस्तम्भमिवात्यशेत कामम् ॥ ५६ ॥

कुसुमं नवयौवनं मनोज्ञं मृदुलाङ्गं लतिकाऽधरः प्रवालः ।
परिपक्वफलं स्तनस्सुगन्धिर्मुखवातो वपुरास्त नन्दनङ्किम् ? ॥ ५७ ॥

जघनस्तनघर्षणासहिष्णु स्वयमन्यत्र कदापि मा प्रयासीत् ।
इति काञ्चनदामभिस्त्रिभिस्तत्किमु सावित्र्युदरं स्मरो बबन्ध ॥ ५८ ॥

प्रवहेद्यमुनाधिरुह्य तुङ्गं पुलिनं यद्यसितोर्मिरस्तबन्धा ।
सुदृशः कबरी, नितम्बसङ्गिन्यवनिस्पृग्विभृतां तदीयलक्ष्मीम् ॥ ५९ ॥

" सखि ! यावदियं सरोरुहाक्षी जनदृग्गोचरतां न याति, तावत् ।
पठतूपनिषद्वचांसि लोकः कुरुतां शास्त्रविचारणां यथेच्छम् ॥ ६० ॥

कथमेष रतौ रतिं विदध्यान्नृपपुत्र्यां मदनः परिस्फुरन्त्याम् ।
सुकृतं कृतवान्मितेतरन्नः पृथिवीशोऽयमलब्ध कन्यकां यत् ॥ ६१ ॥

सखि ! रूपमिदं समस्तु कामं यदसाधारणतां गुणा व्रजन्ति ।
दुहितुर्नृपतेरहं न जाने प्रियसख्यास्सदृशं पतिं पृथिव्याम् ॥ ६२ ॥

इति चास्तुत कामिनीसमूहः कमनीयाभिरनेकफक्किकाभिः ।
अतिचित्रमिदं, यदन्ययोषिद्गुणविद्वेषि मनो नितम्बिनीनाम् ॥ ६३ ॥

सुगुणा हृदयङ्गमस्वभावा निरवद्यान्वयशालिनी सुवृत्ता ।
शुभवर्णपदोज्ज्वलामलाङ्गी वनिता सत्कवितेव सा रराज ॥ ६४ ॥

इति द्वितीयस्सर्गः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीः

श्रीसतीविलासमहाकाव्ये

तृतीयस्सर्गः

पितुर्निदेशादथ पङ्कजाक्षी कान्तं स्वकान्तं व्यचिचीषतासौ ।
विवेश तन्मन्दिरमैन्दुरत्नं यदा वसत्यात्मजनन्यीनन्द्या ॥ १ ॥

एह्येहि जाते ? क्व गतासि भूयात्स्वस्तिर्ममाङ्कं त्वमलङ्कुरु द्राक् ।
इति प्रमोदातिशयादभाणि प्रविष्टमात्रैव सुता स्वमात्रा ॥ २ ॥

(स्वस्तिशब्दोऽनव्ययोऽपि)

अवन्दतामन्दविनीतिनम्रा सावित्र्यमूं तामरसायताक्षी ।
पुलोमजेवेन्द्रमवाप्य कान्तं चिरं रमस्वेति जनन्यवादीत् ॥ ३ ॥

अम्ब ? त्वदाशीर्नियतं फलिष्यत्यर्थोऽनुवर्तेत वचो हि साध्व्याः ।
दिनावसाने स्म पिता ब्रवीति यत्तद्विवक्षाम्यधुना प्रसङ्गात् ॥ ४ ॥

दृग्भ्यां निपीयाङ्कगतां पिता मारुह्य जोते ? शिबिकां सखीभिः ।
भुवश्चरन्ती रमणं वृणीष्व गुणैर्मनोहारिणमित्यवोचत् ॥ ५ ॥

ततो मया वन्दनपूर्वकं तद्वचश्शिरोरत्नसुहृद्व्यधायि ।
ह्रीणा बभाणेत्थमसौ स्ववाण्या वीणाक्वणाधःकरणे प्रवीणा ॥ ६ ॥

वत्से ? ह्रियालं, विदितं हि लोके वयोन्विताभिर्नृपकन्यकाभिः ।
गवेषणं पत्युरनिन्द्यसर्वगुणाकरस्यात्मपरिश्रमेण ॥ ७ ॥

कृतिर्हि कल्पद्रुमवल्लरीव सूते फलं तत्सहकारि दैवम् ।
स्वयत्ननिर्वृत्तमतर्कितोपनतात्परां प्रीतिमहो ! करोति ॥ ८ ॥

(कृतिः + प्रयत्नः)

इत्थं विमृश्यैव पिता मनीषी स्वतन्त्रतां दित्सति तेऽत्र कृत्ये ।
सतां मतिस्सत्पथमेव यायादिदञ्च सर्वं ह्यतिरोहितं ते ॥ ९ ॥

(क्रमशः)

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

निर्माता भारतहितैकदत्तदृष्टिः सुमित्रानंदवर्धनो[५] लंकोपरोधक्षमः[६] विभीषण-[७]
सांत्वननिपुणः जनस्थानसंचारव्यसनी[८] सत्यासादनैकातुरः[९] पाषाणप्रतिमवनिता-[१०]
कुलप्रधानोद्धारकारी[११] पतत्पक्षपाती[१२] वैदेह्यखिलदुःखनिवारणबद्धदीक्षः शबरनि-
पादादिनीचजातिजातानुजिघृक्षुः उग्रचापलताभंजनैकप्रवीणः[१३] सर्वत्रप्रसृत-
दुस्सुराखिलदुर्विलासविलोपबद्धकंकणः श्रीमोहनदासकरमचंदगांधीमहाशयः
भारतराजकीयक्षेत्रं प्राविशत् । तदानीं तु विज्ञानयुगेऽपि वानरा इव भारतीय-
नरा अपि नवयुगीनशस्त्रास्त्रज्ञानविदूरा एव आसन् । तथाविधेष्वेव शक्तिहीन
दुःखदीनदास्यदूनस्वार्थलीनोदासीनपराधीनजनस्तोमेषु विलक्षणक्रांत्या अभूत-
पूर्वमुत्साहमुत्पाद्य सत्याग्रहनामकं रामबाणमाविष्कृत्य अहिंसायुद्धैरत्युद्भुतमेव
प्रचंडांदोलनमुद्भाव्य त्रिंशद्वर्षान् यावत् अव्यहतं विश्वसाहसेन भगीरथप्रयत्नेन
च प्रयत्य प्रथमतः संप्रार्थ्य अनुयाच्य अभिवंद्य अभिनंद्य अनुनीय प्रसाद्य
आराध्य ततो नैराश्येन संक्रुध्य निरुध्य प्रतिबध्य विरुध्य नियुध्य च अंततः
स्वराज्यं संपादितवान् श्रीराम इव स्वकलत्रम् । तदेतत्सर्वमपि तदीयमहात्मताया
एव महिमा, महान् गरिमा, प्रभावः परिणामश्चेत्यत्र राजकारणमर्मविदो न
कस्याप्यंशतोपि संशीतिरत्र स्फीतालोकमध्यवर्तिघटस्फुटे विषये । अत एवोक्ताऽ
भियुक्तैर्युक्तमेयमुक्तिर्मुक्ताफलोपमा "क्रियासिद्धिःसत्वे भवति महतां
नोपकरणे" इति ।

सहसंपादकः

५-६ सुमित्रायाः— सन्त्रिणां च । लंकाया उपरोधक्षमः— अलं कोपरोधक्षमः। ७ विभिषणस्य—अभयंकरम् । ८ नासिकक्षेत्रम्—जनानां स्थानम् । ९ सत्याः भार्यायाः— सत्यस्य । १० अहल्या— शिलासदृशाङ्गनी । ११ जटायुः— पतितः । सीता—वै देही । १२ शिवधनुः—भयंकरचापल्यम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

॥ श्रीशः शरणम् ॥

दक्षमुखरक्षणं नामडिमरूपकम्

पैत्ताम्बाडिरामानुजकविना विरचितम् ॥

दिशतां लक्ष्मीं लक्ष्मीनारायणरूपदिव्यदंपत्योः ।
प्रणतपरित्राणरते विजितारिकुले च चरणयोर्युगले ॥

नान्द्यन्ते

सूत्रधारः— समन्तादवत्रलोक्य - (सहर्षं) मदागमनसमय एव

रङ्गप्रसाधनारम्भदुन्दुभिध्वनयो यथा
कादंबिनीमृदुध्वानाश्श्रूयन्तेऽद्य समन्ततः ॥२॥

तदेतदिनारब्धकृत्यानि, संपूर्णानि मङ्गलप्रदानानि च भवेयुः । तन्मम प्रियगृहिणीमाह्वये । (नेपथ्याभिमुखं विलोक्य) आर्ये इतस्तावत् ।

प्रविश्य

नटी— आणवेदु । छाया । आज्ञापयतु ।

सू— आर्ये, कृष्णारण्याहिपतिनगरक्षेत्रयुग्मस्य मद्धये पण्णातीरे विलसति महान्सत्रनामाग्रहारः । यस्मिन्पूर्वं सुचिरमवसन्रंगरामानुजाख्याः योगीन्द्रास्त्वाश्रितजनकृतामोघकारुण्यपूर्णाः ॥३॥

तस्मिन्गुरूणां महिते हि तेषां दिव्ये तुलामासगमूलतारे ।
दिव्याश्रमे जन्ममहासमेयं विराजते ब्रह्मविदोघपूर्णा ॥४॥

तदत्र केन कविना विरचितं किलामाभितेतव्यमभिनवरूपकम् ।

न— (सत्वरं) किं विसुमरिदं अज्जेण । तस्सिं एव्व अग्गहारम्मिरूपे ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सच्चक्क वट्टिवं स अमुत्तासुफलंखुसिरिवराहक्खो ।
सूरीडवासतस्सिं सिरीसन्नत्तो महामदीसंदो ॥५॥

रामाणु आभिहाणो तस्स कुमारो कविप्पवीरोखु ।
तुरुआरुण्णकडक्खप्पवुद्धवाणीसुहाणीजेदि ॥६॥

तुरअमुहदिव्वअरुणा कडक्खदोदेणकविवरिट्ठेण ।
दक्खमहक्खणं खोरइदोऽहिणवोडिमोखु कविपुज्जो ॥७॥

संस्कृतमाश्रित्य— कालेऽस्मिन्कलुषे कलौ कविरसौ कुर्वन्स्वकर्माणि यश्श्रीमद्वेदयुगं पठन्ननुदिनं वेदान्तशास्त्राण्यपि। श्रीशाराधननित्यकार्यकरणासक्तः करिष्यत्यहो तत्प्रीत्यै बहुरूपकाण्यवसरे लब्धेह यस्येक्षणात् ॥८॥

इदि देण एव पुव्वं संकप्पिदं । छा ।
किं विस्मृतमार्येण । तस्मिन्नेवाग्रहारे सत्रे ।
सच्चक्रवर्तिवंशजमुक्ताफलं खलु श्रीवराहाख्यः ।
सूरिरुवास तस्मिन् श्रीशभक्तो महामतिश्शान्तः ॥५॥

रामानुजाभिधानस्तस्य कुमारः कविप्रवरः खलु ।
गुरुकारुण्यकटाक्षप्रवृद्धवाणीसुधानिधिर्जयति ॥६॥

तुरगमुखदिव्यकरुणाकटाक्षतस्तेन कविवरिष्ठेन ।
दक्षमखरक्षणाख्यो रचितोऽभिनवो डिमः खलु कविपूज्यः ॥७॥
इति तेनैव पूर्वं संकल्पितम् ।

सू— (सानुस्मरणहर्षं) आर्ये स्मरामि स्मरामि ।
सत्राभिख्ये स्वाग्रहारेऽभिनेतुं प्राचार्याणामाश्रमे जन्मभेऽस्मिन् ।
कृत्वा हस्ते दत्तवाम्भे डिमाख्यं सोऽसावेतद्रूपकं तत् कवीन्द्रः ॥९॥

चक्रवर्तिकुलोद्भवः कविरेष रङ्गमभूदयं रङ्गलक्ष्मणयोगिपुंगवसंगपावन-आश्रमः । दक्षयज्ञसुरक्षणाभिधमेतदेव हि रूपकं सुप्रभातमिदं दिनं परिमण्डिता च सभाऽपि बुधैः ॥१०॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तदार्ये, एतच्छरदृतुवर्णनरूपगीत्याऽऽर्यमिश्राननुरंजय ।

न— तह । धावंदिणीत अंठासिरि मंदे मंदिसारसेहं सा ।
सरदागमम्मि अहुणा पसण्णसक्खला समाविला अणदी ॥११॥
इतिगायति ।

छा । तथा धावन्ति नीलकण्ठाः श्रीमन्तो भान्ति सारसे हंसाः ।
शरदागमेऽधुना प्रसन्नसलिलास्समाविला नद्यः ॥११॥

सू— आर्ये, एतद्भवद्गीतिसुधानिपाननिष्पन्दगात्रा विलसन्ति सभ्याः ।
सत्रे मखे दक्षसमागमेऽसौ रुद्रो यथा स्वासनसन्निविष्टः ॥१२॥

(निरूप्य) अयमपि वेधाः कमलासने तिष्ठति ।
कुर्वन्ति सत्राभिधयागमेते स्वाभिष्टसिद्ध्यै मुनयश्च देवाः ।
केशेतरैरद्य सुपूज्यमानो दक्षो मुनिस्सोऽयमिहाभ्युपैति ॥१३॥

तदावामपि अनन्तरकरणीयाय सज्जीभवावः
इति निष्क्रान्तौ

प्रस्तावना

ततः प्रविशन्ति स्वासनस्थौ ब्रह्मरुद्रौ, इन्द्रादयो देवाः, नारदादय ऋषयः, तैर्यथोचितं पूज्यमानः प्रजापतिर्दक्षश्च ।

इन्द्रादिदेवाः ऋषयश्च— इत इतः प्रजापतिः ।

द— स्वागतं देवानां तपोधनानां च ।

अप्यारब्धः सर्वफलसिद्धिहेतुः सत्रयागः ।

इ— भवदनुग्रहान्निर्विघ्नो विवर्धते ।

द— दौहित्र वयमपि महाध्वरं करिष्यमाणाः सर्वस्रष्टारं प्रार्थयितुमागताः । कुत्र स भगवान्प्रजापतिः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इ— अयमयं भगवान्, इति ब्रह्माणं दर्शयति

द— (ब्रह्माणं वीक्ष्य) सांजलिबन्धं—

येनैव निखिलमेतद्भुवनं सचराचरं स्वयं सृष्टम् । वयमपि माधव नाभीकमलभवायास्तु ते नमस्तस्मै ॥१४॥ इति प्रणमति ।

ब्र— स्वागतं प्रजापतये इत आस्यताम् । इति तदुचितमासनं दर्शयति ।

द— समीपत आसने समुपविष्टं निजमबहुमानयन्तं स्वपरिजनसमेतं स्वजामातरं प्रमथाधिपं वामकटाक्षेणावलोकयन्—उपविश्य—भवदनुग्रहादध्वरमेकं कर्तुम्। उद्युक्तोऽस्मि तदध्वरभुवमलंकृत्यानुगृह्यताम् ।

ब्र— (सहर्षं बहुमानं) कस्याः देवतायाः प्रीतये प्रारभ्यतेऽयमध्वरः ।

द— साक्षाल्लक्ष्मीः पतेः प्रीत्यर्थमेव ।

ब्र— तन्ममापि महती प्रीतिः ।

इ— उपविशन्ति ।

द— (सर्वान्वीक्ष्य)

भो भोः शृण्वन्तु मद्वाक्यं विबुधाश्च तपोधनाः ।
सत्यवादी हि लोकेऽस्मिन्नेतद्धातृवदप्यहम् ॥१५॥

सर्वे—यः स्वात्मजाः गिरिश—काश्यपचन्द्रमोभ्यो दत्त्वाखिलं स्वयमिदं हि जगत्ससर्ज । व्याप्तं सुरासुरमुखाखिलजन्तुवर्गैस्सोऽसौ भवानपर एव हिरण्यगर्भः ॥१६॥

द— रुद्रं निर्दिश्य—अयं शंकरः—

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्मशानवासी गजचर्मवासाः नरास्थिमाली शवभस्मधारी ।
सन्त्यक्तनिष्ठोऽविहितानुयायी तमोगुणस्यैव निवासभूमिः ॥१७॥

एतच्चतुर्मुखाज्ञापरवानहमद्य मत्सुतामदिशम् ।
श्रुतिमिव शूद्रायास्मै दुष्टेष्टायाविशुद्धाय ॥१८॥

यदा जग्राह मत्कन्यां तदैवायं महान्सुतः ।
पूज्योऽहमपि तत्तेन ह्यथवा स्वागतोक्तिभिः ॥१९॥

(सक्रोध भ्रूभङ्गं) अपुरस्कुर्वन्नस्मान्भूतेशो वृषभवाहनः सोऽयम् ।
परिपूर्णाहंकारी स्थाणुवदास्ते निजासने स्थाणुः ॥२०॥

तस्मादस्मच्छापयोग्योऽशिवोऽयं देवैस्साकं हव्यभागोऽस्य माभूत् ।
सर्वस्मिन्नप्यध्वरे दानवानां यद्वद्दिव्यो नास्ति भागोऽमृतौघे ॥२१॥

इति सजलधारं शापं ददाति—

नेपथ्ये

माध्यन्दिनसवनार्थमध्वर्यवस्त्वरन्ते तत्सर्वैरप्यलंकरणीया यज्ञवेदिः ।

सर्वे— श्रुत्वा-(सत्वरं) इमे वयमागच्छामः ।

इति निष्क्रान्ताः सर्वे

इति दक्षमखरक्षणाख्यडिमरूपके प्रथमोऽङ्कः

———

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

काफीपानविडम्बनम्

लेखकः— पं. के. व्ही. कृष्णमूर्तिशास्त्री, डेक्कन कालेज-रिसर्च इन्स्टिटयूट—पूना ।

साकेतेऽजनि मन्थरा दशरथप्राणाशना-पन्नगी
जज्ञे शूर्पणखेति राक्षसकुलध्वंसाय लङ्कापुरे ।
ताभ्यामप्यतिदारुणां जगदिदं नाशं निनीषुः क्रमे-
णास्नाक्षीत्किमु पद्मभूर्विषवधूं काफीत्यभिख्यां भुवि ॥१॥
× दृष्टादावविसीनियाख्यविषये व्याप्तारबीये ततो
ब्रेझिल्वासिजनैः प्रवर्ध्य विधिवद्द्वीपान्तरं प्रापिता ।
आनीताय जनैः प्रमूढमतिभिः स्वां भारतीयैर्भुवं
सर्वेषां मुखकन्दराण्यहरहः काफी द्रुतं गाहते ॥२॥
श्रीलक्ष्म्याः किल सेवया द्रविणसंप्राप्तिः फलं दृश्यते
अंहोनिष्कृतये च भूसुरगणैराम्नायते सा त्रयी ।
वैदुष्याधिगमो विरञ्चिललनोपास्तेः फलं विश्रुतं
काफीसेवनजं फलं श्रुतचरं नामुष्मिकं नैहिकम् ॥३॥
क्रीत्वा वर्तुलसुन्दराणि विपणेर्बीजानि तज्ज्ञाश्चिरं
भृष्ट्वाऽमुक्तकरं शरावनिहितान्याधूम्रवर्णोदयम् ।
चूर्णीकृत्य सघुर्घुरस्वनमयोयन्त्रेण तैश्चूर्णिते-
स्तप्तं वारि विमिश्य सारमखिलं गृण्हन्त्यधोभाजने ॥४॥
तां काफीं सितशर्कराद्विगुणितस्वादिम्नि दुग्धेऽर्पितां
* पर्यायेण करद्वयस्थरजतामत्रद्वयस्नाविताम् ।
सोत्साहं परिचूषतां विगलितध्येयान्तरं यो नृणा-
मानन्दः स हि माति नैव भुवने दृश्यं ह्यवाभ्यामिदम् ॥५॥

× अत्र एन् सैक्लोपेडिया द्रष्टव्या । * दाक्षिणात्यः संप्रदायः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रागद्रेः शिखरोद्गतेऽपि तरणौ शय्यां न मोक्तुं क्षमाः
प्रावृत्यावरणैर्दृढैरपघनांस्तन्द्रालवः शेरते ।
ये वर्षिष्ठविबोधिता अपि मुहुर्हुंकारमातन्वते
काफीपेषणयन्त्रजध्वनिरमूनुत्थापयत्यञ्जसा ॥६॥

चित्तक्षोभवशादमर्षभरिताः कृत्वा विवादान्निशि
स्वान्तारुन्तुदभावितैः प्रियतमा आकृष्य निद्रां गताः ।
मृष्टं राजतभाजनं करतले काफीप्रपूर्णं दधत्—
पत्नीः प्रेमभरेण वीक्ष्य मनुजा हृष्यन्ति कल्ये पुरः ॥७॥

* बुद्धिभ्रान्तिविधायिवस्तुकलितां यां प्रागपेयां स्वकै-
रिस्लामस्मृतिदूषणीं च यवनाः प्राहुः प्रतीच्यां दिशि ।
प्रातः सायममूं परःशतजनौष्ठोच्छिष्टमृद्भाण्डगां
संघीभूय पिबन्ति मञ्चनिहितां सर्वेऽपि काफीं क्षितौ ॥८॥

दुग्धे मुग्धकयोपमे गतरुचौ विक्रेतृभिः शर्करा-
वृत्तान्ते शशशृङ्गसंमितदशां संप्रापिते सर्वतः ।
पर्याप्तासनवञ्चिताः पुनरहो काफीं विना, धीवरै-
र्जालेनेव झषाः स्फुरन्ति सरितः सद्यो जलाद्धृताः ॥९॥

पाद्यार्घ्याचमनीयदानमखिलायागन्तुकाय श्रुति-
स्मृत्यर्थागमसंप्रदायविदितं दूरे समुत्सारितम् ।
आसृष्ट्यश्रुतदृष्टपूर्वमवनावातिथ्यमेतन्नृणां
दालिश्यस्य निदर्शनं कलियुगे काफीति यद्दीयते ॥१०॥

———

* अत्र एन् सैक्लोपेडिया द्रष्टव्या

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नियमावलिः

(१) मधुरवाणीनाम्नीयं संस्कृतपत्रिका प्रतिमासं पौर्णिमायां प्रकाशते.

(२) अस्यां प्रायः प्रत्यङ्क्रमेका लघुकथा, सनातनधर्मविषयकः प्रबन्धः प्राचीनसाहित्यं चान्ये प्रचलितविषयका विवेचनात्मका लेखाः प्रकटीक्रियेरन्। सनातनधर्मद्रोहिणो लेखा नावकाशं विन्देरन्। ग्राहकेतरेषां लेखाः पद्यानि वा न प्रकाश्येरन्।

(३) पत्रिकाया अस्याः अग्रिमदेयं मूल्यं मार्गव्ययसहितं रूपकपञ्चकम्। अङ्कस्यैकस्याणकाष्टकं मूल्यम्। द्वीपान्तरवासिनां तु वार्षिकं मूल्यं सप्तरूप्यात्मकम्। विना मूल्यमादर्शसाञ्चिका न प्रदीयेत। तदिच्छुभिश्च आणकाष्टकमूल्यानि शुल्कपत्राणि प्रहीयन्ताम्।

(४) मधुरवाण्याः श्रेयोभिवृद्धये दशरूपकाणां दातारः सहायकाः, पञ्चविंशतिरूपकप्रदाः पोषकाः, पञ्चाशद्रूप्यकदायिनोऽनुग्राहकाः शताधिकप्रदा संरक्षका इति व्यपदिश्येरन्।

(५) मधुरवाण्यां नीरसा असुवाच्याक्षरा एकपार्श्वे एवालिखिता लेखाः नावसरमासादयेयुः। लेखपरिवर्तनादिषु निरनुयोज्याधिकाराः खलु संपादकाः। अप्रकाशिता लेखा विना प्रापणव्ययं न प्रतिप्रहीयेरन्।

(६) लेखा, विज्ञापनानि, समलोचनापेक्षिणो ग्रन्थाः, पत्रिकाश्चेत्यादिसकलं मधुरवाणी कार्यालय बेळगांव देशपांडेगल्ली नं. १४५८ इति संकेतेन प्रेष्यम्।

पत्रं मूल्यधनं वा प्रेषयद्भिः निजसंकेतादिकं देवनागरीलिप्यैव सुस्पष्टं विलेखनीयम्। भूतपूर्वैर्ग्राहकैः पत्रस्य धनस्य वा प्रेषणसमये ग्राहकसंख्यालेखनं नैव विस्मरणीयम्। उत्तरप्रेप्सुभिरवश्यं प्रेषणीयः प्रापणव्ययः।

प्राप्तिस्थानम्

मधुरवाणी कार्यालय, देशपांडेगल्ली १४५८ बेळगांव.

Printed at Veer-bharat Printing Press, Belgaum. by its proprietor A. P. Chougule and Published by R N. Galgali House No. 1458 Deshpande Galli Belgaum.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

Regd No. B. 3664.

PINK
OINTME

खरूज १४ तासां

पिंक म

तोंडावरील तारुण्यपिटिका (मुरुम
इसब व त्वचारोग
सुगंधीत मल

यानें कपडे खराब ह

सल्फर, मर्क्युरी, कॅम्फरझिंक आणि हौसर, चंदन तेलांत
बनविलेले

पिंक मलम

स्टार कंपनी, बेळगांव.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.